पादप्रक्षालनं, क्ली, ( पादयोः प्रक्षालनम् । ) चरणधौतम् । पा धोओया इति भाषा ॥ अस्य गुणाः । मेधाजनकत्वम् । पवित्रत्वम् । आयुष्यत्वम् । अलक्ष्मीकलिनाशकत्वञ्च । इति राजवल्लभः ॥ ( यथा च,—

"पादप्रक्षालनं पादमलरोगश्रमापहम् ।
चक्षुःप्रसादनं वृष्यं रक्षोघ्नं प्रीतिवर्द्धनम् ॥"

इति चिकित्सितस्थाने चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम् ॥ )

पादप्रधारणं, क्ली, ( पादौ प्रधार्य्येते कण्टकादिभ्यो रक्ष्येतेऽनेनेति । प्र+धृ+णिच्+ल्युट् । ) पादुका । इति केचित् ॥

पादप्रहारः, पुं, ( पादस्य पादेन वा प्रहारः । ) पदाघातः । लाति इति भाषा ॥ यथा ।
"नायिकापादप्रहारादिना नायकस्य कोपादिवर्णनम् ।" इति काव्यप्रकाशे सप्तमोल्लासः ॥
( यथा च साहित्यदर्पणे । १० । ४६ ।

"दासे कृतागसि भवत्युचितः प्रभूणां
पादप्रहार इति सुन्दरि ! नात्र दूये ।
उद्यत्कठोरपुलकाङ्कुरकण्टकाग्रै-
र्यत्खिद्यते मृदु पदं ननु सा व्यथा मे ॥" )

पादबन्धनं, क्ली, (पादयोर्गोमहिष्यादीनामिवार्थः । यद्बन्धनम् ।) गोमहिष्यादिबन्धनम् । इति जटाधरः ॥ पादपशब्दटीकायां भरतश्च ॥ ( बध्यतेऽनेनेति । बन्ध+करणे ल्युट् । पादयोर्बन्धनं तत्साधनवस्तु । गोमहिष्यादीनां पादबन्धनद्रव्यम् । यथा, हेमचन्द्रः । ४ । ३२६ ।
"स तु शृङ्खलकः काष्ठमयैः स्यात् पादबन्धनैः ॥")
चरणोद्दानञ्च ॥

पादमूलं, क्ली, ( पादयोर्मूलम् ।) चरणाधोभागः । यथा, हेमचन्द्रः ।
"पादमूलं गोहिरं स्यात् पार्श्वस्तु घुटयोरधः ॥"
( यथा, रामायणे । २ । ७८ । २५ ।
"सा पादमूले कैकेय्या मन्थरा निपपात ह ।"
प्रत्यन्तपर्व्वताधोभागः । यथा, कथासरित्सागरे । १ । २७ ।
"महीं भ्रमन्तौ हिमवत्पादमूलमवापतुः ॥" )

पादरक्षणं, क्ली, ( पादयो रक्षणं यस्मात् । ) पादुका । इति हेमचन्द्रः । ३ । ५७८ ॥

पादरज्जुः, स्त्री, ( पादबन्धनार्थं रज्जुः । ) हस्तिपादबन्धनरज्जुः । तत्पर्य्यायः । पारी २ । इति जटाधरः ॥ चरणबन्धनदाममात्रञ्च ॥

पादरथी, स्त्री, ( पादस्य रथी क्षुद्रो रथ इव । ) पादुका । इति त्रिकाण्डशेषः ॥

पादरोहणः, पुं, ( पादैर्मूलैः रोहतीति । रुह+ल्युः । ) वटवृक्षः । इति राजनिर्घण्टः ॥

पादवल्मीकः, पुं, ( पादे वल्मीक इव । ) श्लीपदम् । इति हेमचन्द्रः । ३ । १२६ ॥ ( श्लीपदरोगशब्देऽस्य विवरणं ज्ञातव्यम् ॥ )

पादविकः, पुं, ( पदवीं धावतीति । पदवी+"मायोत्तरपदपदव्यनुपदं धावति ।" ४ । ४ । ३७ । इति ठक् ।) पथिकः । इति सिद्धान्तकौमुदी ॥

पादविरजाः, [ स् ] स्त्री, ( पादौ विरजा धूलिविहीनौ यस्याः । ) पादुका । इति हारावली । ७४ ॥

पादशः, [ स् ] अ, पादं पादम् । पादशब्दात् वीप्सायां शस्प्रत्ययनिष्पन्नम् । इति व्याकरणम् ॥ ( यथा, मनुः । १ । ८३ ।

"अरोगाः सर्व्वसिद्धार्थाश्चतुर्व्वर्षशतायुषः ।
कृते त्रेतादिषु ह्येषामायुर्ह्रसति पादशः ॥")

पादशैलः, पुं, ( पादः महाद्रिसमीपस्थः क्षुद्रपर्व्वतः स एव शैलः ।) प्रत्यन्तपर्व्वतः । इति शब्दरत्नावली ॥

पादशोथः, पुं, ( पादोद्भवः शोथः । शाकपार्थिवादिवत् समासः । ) पादगतशोथः । यथा,—

"अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति नारीन्तु मुखजो गुह्यजो द्वयम् ॥"
इति माधवकरः ॥

( यथा च हारीते चिकित्सितस्थाने २६ अः ॥

"शोथो भवेच्च विकलेन्द्रियरोममार्गः
क्षीणे बले वपुषि चाम्लकटूष्णसेवया ।
शैत्यात्तथा विषमपिच्छिलसेवनेन
रुक्षाभिघातपतनेन च धारणाद्वा ॥
आमाशये गतिरतोऽपि नरस्य यस्य
अग्नौ प्रधावति ततोऽपि च दोष एवः ।
करोति पाणिचरणे च पृथक् प्रसूतौ
द्वन्द्वेन वा भवति शोथविकारचारः ॥
नरस्य चान्तःप्रभवाश्च शोथाः
साध्या भवेयुर्व्वनिता मुखेषु ।
असाध्यकाः सर्व्वशरीरगाश्च
पादे स्त्रिया वा वदने नरस्य ॥" )

पादस्फोटः, पुं, ( पादस्य स्फोटः । पादं स्फोटयतीति वा । स्फुट्+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ) रोगविशेषः । तत्पर्य्यायः । विपादिका २ । इत्यमरः ॥ स्फुटी ३ स्फुटिः ४ पादस्फोटिः ५ । इति शब्दरत्नावली ॥ स तु एकादशक्षुद्रकुष्ठान्तर्गतद्वितीयकुष्ठम् । यथा,—
"वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ।
पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं विदारणं येन तत् । इति माधवकरः ॥ अस्य चिकित्सा कुष्ठशब्दे द्रष्टव्या ॥

पादहारकः, त्रि, पादाभ्यां ह्रियतेऽसौ । पादशब्दात् निपातनात् कर्म्मणि वुकप्रत्ययान्तः । इति मुग्धबोधव्याकरणम् ॥ ( "कृत्यल्युटो बहुलम् ।" ३ । ३ । ११३ । इति कर्म्मणि ण्वुल् । इति सिद्धान्तकौमुदी ।) चरणद्वारा हरणकर्त्ता ॥

पादाग्रं, क्ली, ( पादयोरग्रम् । ) चरणाग्रभागः । तत्पर्य्यायः । प्रपदम् २ । इत्यमरः ॥

पादाङ्गदं, क्ली, ( पादस्य अङ्गदमिव । ) नूपुरम् । इत्यमरः ॥

पादात्, पुं, ( पादाभ्यामतति गच्छतीति । अत+क्विप् । ) पादातिः । इति शब्दरत्नावली ॥ ( पादाभ्यामत्तीति । अद्+क्विप् । इचः । इति व्युत्पत्तिलब्धोऽर्थः ॥ )

पादातं, क्ली, ( पदातीनां समूहः । पदाति+"भिक्षादिभ्योऽण् । ४ । २ । ३८ । इत्यण् । ) पत्तिसंहतिः । पदातिसमूहः । इत्यमरः ॥ ( यथा, महाभारते । १२ । ६६ । ८ ।
"सादिनामन्तरे स्थाप्यं पादातमपि दंशितम् ॥")

पादातः, पुं, ( पादाभ्यामततीति । अत+अच् ।) पादातिः । यथा,—
"पदातिपत्तिपादातपादातिकपदाजयः ॥"
इत्यमरमाला ॥
( यथा, महाभारते । २ । ५१ । ४३ ।

"अयुतं त्रीणि पद्मानि गजारोहाः सयादिनः ।
रथानामर्व्वुदं चापि पादाता बहवस्तथा ॥")

पादातिः, पुं, ( पादाभ्यामततीति । अत+इन् ।) पदातिः । इति हेमचन्द्रः ॥

पादातिकः, पुं, ( पादातिरेव । पादाति+स्वार्थे कन् । ) पदातिः । इति हेमचन्द्रः । ३ । १६२ ॥

पादारकः, पुं, ( पाद इव ऋच्छतीति । ऋ+ण्वुल् । ) नौलिन्दः । इति त्रिकाण्डशेषः ॥

पादालिन्दी, स्त्री, (पाद इव अलिन्दो यत्र । गौरादित्वात् ङीष् । ) नौका । इति हारावली । ५६ ।

पादावर्त्तः, पुं, ( पाद इव आवर्त्तते इति । आ+वृत्+अच् । ) अरघट्टकः । इति हेमचन्द्रः । ४ । १५६ ॥ रहट् इति हिन्दीभाषा ॥

पादाविकः, पुं, ( अव रक्षणे+भावे घञ् । पादेन अवः रक्षणम् । तत्र पादावे पादेन शरीरादिरक्षणे नियुक्तः । पादाव+"तत्र नियुक्तः ।" ४ । ४ । ६९ । इति ठक् । ) पदातिः । इति शब्दरत्नावली ॥

पादी, [ न् ] पुं, (पादोऽस्यस्तीति । पाद+इनिः ।) पादविशिष्टजलजन्तुगणः । अस्य गणना गुणाश्च । यथा, भावप्रकाशे ।

"कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कवः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः ॥"

चतुर्थांशभागी । यथा, मनुः । ८ । २१० ।

"सर्व्वेषामर्द्धिनो मुख्यास्तदर्द्धेनार्द्धिनोऽपरे ।
तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥"

पादुकः, त्रि, ( पद्यते गच्छतीति । पद+"लषपतपदेति ।" ३ । २ । १५४ । इति उकञ् । ) गमनशीलः । पदधातोः कर्त्तरि णुकप्रत्ययनिष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

पादुका, स्त्री, ( पादूरेव । पादू+स्वार्थे कन् ततो ह्रस्वः ।) चर्म्मादिनिर्म्मितपादाच्छादनम् । जुता इति भाषा ॥ तत्पर्य्यायः । पादूः २ उपानत् ३ । इत्यमरः ॥ पन्नद्धा ४ पादरक्षिका ५ प्राणहिता ६ । इति हेमचन्द्रः ॥ पन्नद्धी ७ पादरथी ८ । इति त्रिकाण्डशेषः ॥ कौषी ९ । इति शब्दरत्नावली ॥ * ॥ तस्या धारणविधिर्यथा,—

"वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च ।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥"
इति ज्योतिस्तत्त्वम् ॥